International Research Journal of Human Resource and Social Sciences
ISSN(O): (2349-4085) ISSN(P): (2394-4218)
Impact Factor 5.414 Volume 6, Issue 4, April 2019
**Website**- www.aarf.asia, **Email** : editoraarf@gmail.com, editor@aarf.asia

# विभिन्नदर्शनेषु वाक्यविमर्शः

सुषमा, शोधार्थी

संस्कृत विभाग महर्षि दयान्द विश्वविद्यालय

शोध-आलेखसारः- वाक्य-सम्बन्धे दार्शनिकानां मतवैभिन्यं स्वाभाविकमेव विधते। संहत्यार्थमभिदधति पदानि वाक्यम् एकार्थः पदसमूहो वाक्यम्।

प्रमुखशब्दाः वाक्यम् षड्दर्शन, न्यायलीलावती, व्याकरण मीमांसाकोश।

इह खलु लौकिकाः परीक्षकाश्च बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तः वाक्यमुच्चारयन्ति। वाक्यं= पदसमूहः। वाक्यत्वं च विशिष्टार्थपरशब्दत्वम्।[1] वाक्यं द्विविधं प्रमाणवाक्यम्, अप्रमाणवाक्यं चेति। तत्र प्रमाणवाक्यम् आकाङ्क्षा-योग्यता-संनिधिमतां पदानां समूहः।[2] यथा- 'गामानय'।

अप्रमाणवाक्यं तु आकाङ्क्षादिरहितं वाक्यम्। यथा- ''वह्निना सिञ्चति'' ''ह्रदो वह्निमान्'' इत्यादिवाक्यम्।

[1] त.चि.म. पृ. 4

[2] तर्कभाषा पृ. 4, (तर्कसंग्रह) (सा.द.)

© **Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

अथ वा यादृशशब्दानां यादृशार्थविषयिताकबोधं प्रति अनुकूला परस्पराकाङ्क्षा तादृशशब्दः एव तथाविद्यार्थे वाक्यम्।[3]

'समभिव्याहारो वाक्यम्' इति मीमांसकाः आहुः। तदर्थश्च साध्यत्वादिवाचक द्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपादयोः सह उच्चारणम्। यथा- 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति।[4]

लिङ्गादिपदघटितं वाक्यं द्विविधं-विधिः, निषेधश्च। तत्र विधिः 'स्वर्गकामो यजेत' इत्यादिवाक्यम्। निषेधस्तु ''न कलञ्जं भक्षयेत्'' ''न सुरां पिबेत्'' इत्यादि।[5]

**भिन्न-2 दर्शनेषु वाक्यस्वरूपम् अभिमतम्-**

सांख्यदर्शनानुसारेण वाक्यस्वरूपम्- सांख्याः कार्याणां वर्णानामेव वाचकत्वं इच्छन्तः वैयाकरणाभिमतं स्फोटवादः भाट्टाभिमतं वर्णनित्यत्वं च निराचक्रुः।

**''प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः''**

**न शब्दनित्यत्वं कार्यताप्रतीतेः''**[6]

इति सांख्यसूत्रद्वयम् अत्रानुसन्धेयम्। एवं च नैयायिकवत् वर्णसमूहः पदम्, पदसमूहो वाक्यम् इति एव संख्यानां मतम्।

**योगदर्शनानुसारेण वाक्यस्वरूपम्ः-**

---

[3] श.श.प्र.श्लो.13, टी.पृ. 63-64, (प्र.)

[4] तै.सं. 3/5/7

[5] अर्थसंग्रहे उत्तरभागे

[6] सां.सू. 5/57,58

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

पातञ्जला यौगास्तु वैयाकरणवत् आहुः। यथा- योगसूत्रे- ‘शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरः तत्प्रविभाग संयमात् सर्वभूतरूतज्ञानम्’’[7] इति उक्तम्।

तत्र भाष्यं- ‘‘तदेकं पदमेकबुद्धिविषयमेकप्रयत्नाक्षिप्तम्[8] अभागम् अक्रमवर्णं’’ बौद्धमन्त्यवर्णप्रत्यय- व्यापारोपस्थापितं परत्र प्रतिपिपादयिषया वर्णैरेवाभिधीयमानैः उच्चार्यमाणैः श्रूयमाणैश्च श्रोतृभिरनादिवाग्व्यवहार वासनानुविद्धया लोकबुद्धया सिद्धवत्संप्रतिपत्त्या प्रतीयते। तस्य संकेतबुद्धितः प्रविभागः’’

**वाचस्पतिमिश्राः एवमाहु-**

‘‘अर्थप्रत्ययो हि वर्णैर्नियतक्रमतया परस्परं संभवद्भिरशक्यः’’।[9] न च संस्कारद्वारा आग्नेयादीनाम् इव परमापूर्वे स्वर्गे वा जनयितव्ये नियतक्रमाणामपि साहित्यमर्थबुद्ध्युपजनने च वर्णानामिति।

**मीमांसकमते वाक्यस्वरूपम्**

**जैमिनीयाः-**श्रोत्रग्राह्या वर्णा एव शब्दः। तेषामेव वाचकत्वम्- अर्थ-प्रत्यायकत्वम्। ते कण्ठताल्वाद्यभिघातव्यङ्ग्याः नित्या विभवश्च। त एव च वर्णाः समुदिताः पदवाक्यव्यपदेशभाजोऽर्थप्रत्यायकाः-इत्याहुः।

**नैयायिकमते वाक्यस्वरूपम्-**

---

[7] यो.सू. 3/17

[8] यो.भा.3/17, पृ- 318

[9] तत्त्ववैशारदी- 3/17, पृ.320

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

नैयायिकाः-वर्णा एव समुदिताः पदवाक्यभावमापन्नाः अर्थप्रत्यायकाः इत्याहुः। तथा च भाष्यं[10]

''वाक्यस्थेषु खलु वर्णेषूच्चरत्सु''(उच्चार्यमाणेषु इत्यर्थः) प्रतिवर्णं तावत् श्रवणं भवति। श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते'' इति।

**न्यायलीलावत्यां च**

**''किं तर्हि प्रातिपदिकम्? क्रमवद्वर्णसंहतिरिति ब्रूमः।''** [11] इत्युक्तम्।

**न्यायमञ्जयामपि।**[12]

''किं पुनरिदं पदं नाम? किं च वाक्यमिति। वर्णसमूहः पदम्। पदसमूहो वाक्यम्'' इत्युक्तम्। एतन्मते वर्णा अनित्याः।

**वेदान्तिमते वाक्यस्वरूपम्**

वेदान्तिनः

**''प्रत्येकवर्णानुभवभावितभावनानिचयलब्धजन्मस्मृतिदर्पणारूढवर्णमाला (वाक्यम्)''** इति वदन्ति।

**यदुक्तं शाब्दनिर्णये**[13]

[10] न्या.भा. 3/2/59

[11] न्या.ली.पृ. 671

[12] न्या.म.आ 6, भा.2.पृ. 143

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**''वर्णाः स्वज्ञानसंस्कारैः संभूय स्मृतिकारिभिः।**

**क्रमेणैकस्मृतौ बुद्धा बोधयन्त्यर्थमञ्जसा।।'' इति।**

**न्यायदर्शनानुसारेण वाक्यार्थस्वरूपम्**

**न्यायभाष्यकारः-**

**''संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते।''**[14]

इति वदन् पदार्थज्ञानानन्तरं वाक्यार्थज्ञानं भवतीति आवेदयति। वाक्यार्थस्वरूपं तु भाष्यकारेण न प्रदर्शितम्।

तात्पर्यटीकाकारा वाचस्पतिमिश्राः शब्दप्रमाणस्यानुमानविधया प्रमाजनकत्वमिति वैशेषिकमतानुवादसमये अनुमानद्वयमुपातिष्ठिपन्। यथा-

''पदैः स्मारिताः पदार्था गुणप्रधानभावेनावस्थिताः संसर्गवन्तः,[15] आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वात्'', 'अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकाङ्क्षादिमत्त्वे सति पदकदम्बत्वात्'' अनेन पदार्थानां संसर्गो वाक्यार्थः इति सूचयन्ति। तथा तत्रैव स्वमतप्रतिपादनावसरे-

''तस्मात् पदान्येव[16] पदार्थस्मरणद्वारेण तत्संसर्गं लक्षयन्ति वाक्यार्थे प्रमाणम्'' इति पदार्थानां संसर्गस्य वाक्यार्थत्वमाविष्कृतवन्तः।

---

[13] शा.नि.श्लो.पृ. 12

[14] न्या.सू. 3/2/62

[15] न्या.वा.ता.टी.2/1/52, पृ. 414,415

[16] न्या.वा.ता.टी.2/1/52, पृ 415

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

## मीमांसादर्शनानुसारेण वाक्यार्थस्वरूपम्

### मीमांसाभाष्ये वाक्यार्थस्वरूपम्-

इतरपदार्थान्वितः पदार्थ एव वाक्यार्थ इति मीमांसकानां मतम्। तथा हि भाष्ये ''अनेकपदार्थानुरक्तो वाक्यार्थः[17] स च पदार्थमूलः, न निर्मूलः, न च संकेतमूलः''। तथा ''अर्थाभिधानसामर्थ्यात्''[18] इति सूत्रे-

**''अथ वाक्यार्थोऽयमित्युच्येत, नैवं शक्यम्, न हि अनन्वितः पदार्थो भवति वाक्यार्थः।''**

तेन इतरपदार्थान्वितः पदार्थे वाक्यार्थ इति प्रतीयते। परं तु ''उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्''[19] इति सूत्रे।

**'' न च पदार्था एव वाक्यार्थः, सामान्ये हि पदं वर्तते, विशेषे वाक्यम्। अन्यच्च सामान्यम् अन्यो विशेषः''** इति भाष्यात्। ''परस्परान्वितता हि विशेष उच्यते। अनन्वितावस्थं सामान्यम्''।

बृहतीग्रन्थात् पञ्चिकाग्रन्थाच्च पदार्थानां परस्परसंसर्गः वाक्यार्थ इत्यवगम्यते। तथा ''तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य[20] तन्निमित्तत्वात्'' इति सूत्रभाष्ये-

---

[17] शा.भा. 1/1/7

[18] जै.सू. 3/2/1/1

[19] जै.सू. 1/1/24

[20] जै.सू. 1/1/25

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

''विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः'' इत्युक्तम्। अत्र वाक्यार्थ इत्यस्य वाक्य फलमित्यर्थः। वाक्यफलज्ञानविषयः विशिष्टार्थः-परस्परान्वितोऽर्थः वाक्यार्थ इति तदाशयः। तथा-

''पदार्थैः संस्कृतः पिण्डितोऽर्थो वाक्यार्थः''[21] इति संसृष्टोऽर्थो वाक्यार्थ इति लभ्यते। तथा अरुणाधिकरणे भाष्यकार आह-

''सर्वत्र तु बोधिते पदार्थे वाक्यार्थ[22] उपपद्यते नान्यथा। सामान्यवृत्ति हि पदम्, विशेषवृत्ति वाक्यम्। सामान्येनाभिप्रवृत्तानां पदार्थानां यत् विशेषेऽवस्थानं स वाक्यार्थः'' इति। अत्र विशेषपदेन संसर्गमेव भाष्यकारो विवक्षति।

**वेदान्तदर्शनानुसारेण वाक्यार्थस्वरूपम्**

**अद्वैतवेदान्तदर्शनानुसारेण वाक्यार्थस्वरूपम्**

''तत्तु समन्वयात्[23] इति सूत्रभाष्ये शंकरभगवत्पादैः अन्विताभिधानवादखण्डनपूर्वकमभिहितान्वयवादस्य समर्थितत्वात् सखण्डार्थवाक्यानां 'गामानय'' इत्यादीनां प्रतिपाद्योऽर्थः पदार्थानां परस्परमन्वयः इत्यवगम्यते। तथा चैतन्मते वाक्यार्थ इत्यस्य वाक्यतात्पर्यविषय इत्यर्थः। स च क्वचित् संसर्गः। क्वचित् वस्तु इति निष्कर्षः। अत एव वेदान्तपरिभाषायां-[24]

---

[21] शा.भा. 1/1/8/32

[22] जै.सू.- 3/1/12

[23] ब्र.सू. 1/1/4

[24] वे.प.प्र.खं.पृ. 80

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्। कथ्यते। वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं। अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः। किन्तु तात्पर्यविषयत्वम्। प्रकृते च ''सदेव सोम्येदमग्र आसीत्'' इत्युपक्रम्य ''तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'' इत्युपसंहारेण विशुद्धे ब्रह्माणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयं संसर्गमवबोधयेत् इत्युक्तम्।

विशिष्टाद्वैतिनामपि वाक्यप्रतिपाद्योऽर्थः पदार्थानां परस्परं संसर्ग एव। तदुक्तं तत्त्वमुक्ताकलापे- ''संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानिचित् भाष्यवाक्यानि''[25] इति। संसर्गस्य वाक्यवेद्यत्वं चाभिहितान्वयस्वीकारे वाक्यघटकपदाभिहितपदार्थगम्यत्वरूपम्, अन्विताभिधानपक्षे च संहतपदशक्तिज्ञानजन्यज्ञानविषयत्वरूपम्।

**व्याकरणदर्शनानुसारेण वाक्यार्थस्वरूपम्**

अर्थवत्सूत्रे वार्त्तिके भाष्ये च अर्थवतः शब्दस्वरूपस्य प्रातिपदिकसंज्ञायां विधीयमानायाम् अर्थवतो वाक्यस्यापि प्रातिपदिकसंज्ञा प्राप्नोति, तत्प्रतिषेधो वक्तव्य इत्याशयेन-

**''वाक्यप्रतिषेधोऽर्थवत्त्वात्''**[26]

''देवदत्त गामभ्याज शुक्लाम् देवदत्त गामभ्याज कृष्णामिति। किं कारणम्। अर्थवत्त्वात्। अर्थवद्धि एतद्वाक्यम्'' इत्याक्षेपः कृतः। ततः आक्षेपबाधकभाष्यं-

**''न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति वाक्ये''**

---

[25] बु.स.श्लो. 13

[26] पा.सू. 1/2/45) (वार्त्तिकम्)

© **Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

तत्र कैयटः- ‘‘न वै पदार्थादिति। स्वं स्वमर्थं प्रतिपादयन्ति पदानि वाक्यम्। पदार्था एव तु आकाङ्क्षायोग्यतासंनिधिवशात् परस्परसंसृष्टा वाक्यार्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्तीति भावः।’’

**मीमांसाकोशे वाक्यार्थस्वरूपम्**

‘‘वाक्यार्थः अनेपदार्थानुरक्तः।[27] स च पदार्थमूलः, न निर्मूलः, न च संकेतमूलः।[28]

वाक्यार्थोऽपि पदार्थोपजनितो[29] भवति नान्यथा। तदुक्तं ‘तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्’।[30]

**वाक्यार्थश्च पदार्थपूर्वको भवति।**[31]

**वाक्यार्थः पदार्थसामर्थ्यजनितो भवति।**[32]

पदज्ञानकरणको वाक्यार्थो द्विविधः भेदरूपः संसर्गरूपश्च, ‘‘राज्ञः पुरुषः’’ इत्यादौ ‘अराजसंबन्धिभिन्नः पुरुषः’ इत्यन्वयबोधात् इति केचित्।

सर्वत्र संबन्ध एव वाक्यार्थः, उक्तरूपापोहस्य प्राचुर्येण भानाभावात्, अपोहस्याप्रसिद्धेश्च। अतः संसर्ग एव वाक्यार्थः।

---

[27] मी.को.पृ. 3463

[28] शा.भा. 1/1/7

[29] जै.सू. 1/1/7-25

[30] शा.भा. 4/3/1/2

[31] शा.भा. 45/1/5/4

[32] शा.भा. 5/1/11/2

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

तस्य च विशिष्टिवैशिष्ट्यरूपवाक्यार्थस्य भानं चतुर्विधम्। विशिष्टस्य वैशिष्ट्यरूपमेकम्। विशेष्ये विशेषणं, तत्र च विशेषणान्तरमित्यपरम्। यथा ''नीलदण्डवान् पुरुषः।'' एकविशिष्टे अपरवैशिष्ट्यमिति तृतीयं ''दण्डी देवदत्तः कुण्डली'' इति। एकत्र द्वयमिति चतुर्थं यथा 'दण्डी कुण्डली देवदत्तः''।[33]

**''वाक्यार्थः संसर्गः नैयायिकमते। अर्थभावनैव कारकविशिष्टरूपेण मीमांसकमते''।**[34]

**''वाक्यार्थः सर्वकारकान्वितक्रियारूपः''।**[35]

---

[33] भा.चि.म.पृ. 79-80

[34] बाल. 73

[35] वा.न्या.सु. 3/3/4/11, (चै.पु) पृ. 1190.भा. 4. पृ0 194 (प्र.)